# M.A. Semester III Examination, 2014
## Sanskrit
## Paper : XI
## (Indian Philosophy Group)

**Time : Three Hours** **Full Marks : 40**

Questions are of value as indicated in the margin

1. प्रश्नत्रयं समाधेयम्— 10×3=30

(क) सत्यपि दृष्टे चानुश्रविके चोपाये दुःखनिवृत्त्यर्थं सांख्यशास्त्रं कथमारम्भणीयमिति वाचस्पत्युक्तरीत्या प्रतिपादयत।

(ख) अर्थापत्तेः प्रमाणान्तरत्वमिष्टं न वेति वाचस्पत्युक्तरीत्या विचार्य्यताम्।

(ग) सांख्यमतानुसारं पुरुषबहुत्वं साधनीयम्।

(घ) व्यक्ताव्यक्तयोः साधर्म्यवैधर्म्ये निरूपणीये।

(ङ) पुरुषस्य बन्धमोक्षयोः कथमुपपत्तिः? कथञ्च तस्य अपवर्गप्राप्तिः सम्भवति इति सुनिपुणं विशद्यताम्।

2. काप्येका कारिका व्याख्येया— 10

(क) प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।
तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु।।

(ख) सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।
गुरु वरणकमेव तमः प्रदीपवच्चाऽर्थतो वृत्तिः।।

(ग) पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।।

---